# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–नवम्बर/दिसम्बर–२०१६

**कक्षा – आचार्य–२, सेमेस्टर–३** **प्रश्नपत्रम् – ४** **गुणाः – ७०**

**विषयः – पुराणेतिहासः** **कोड – CC-5.3.9** **समयः – ११–०२**

**दिनाङ्कः – २८.११.२०१६** **ग्रन्थः – श्रीमद्भागवतपुराणे द्वादशस्कन्धः ।**

**रेवाखण्डे सत्यनारायणकथा । नारदभक्तिसूत्रम् ।**

---

**प्रथमान्वितिः ( युनिट – १ )**

**प्रश्नः १** **कस्याप्येकस्य ससन्दर्भं व्याख्या कार्या** **०४**

(१) *सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना ।*
*श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥*

(२) *वित्तमेव कलौ नृणां जन्माचारगुणोदयः ।*
*धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥*

**प्रश्नः २** **कस्यचिदेकस्य वर्णनं कुरुत ।** **१२**

*१. श्रीशुकदेवस्य अन्तिमोपदेशः ।*

*२. कलियुगस्य धर्माः ।*

**प्रश्नः ३** **कयोश्चित् द्वयोः संक्षेपेण उत्तरं दत्त ।** **०४**

*(१) धर्मः स्वयं कस्य स्वरूपमस्ति ?*

*(२) 'विष्णुरातः' अर्थात् कः ?*

*(३) कृतयुगे धर्मस्य कति पादाः भवन्ति ?*

**द्वितीयान्वितिः ( युनिट – २ )**

**प्रश्नः ४** **ससन्दर्भं कस्याप्येकस्य व्याख्या कार्या ।** **०४**

(१) *अहो ईश्वरलीलेयं दुर्विभाव्या शरीरिणाम् ।*
*यन्नमन्ती शितव्यानि स्तुवन्ति जगदीश्वराः ॥*

(२) *भवे भवे यथाभक्तिः पादयोस्तव जायते ।*
*तथा कुरुष्व देवेश नाथस्त्वं नो यतः प्रभो ॥*

**प्रश्नः ५** **कस्याप्येकस्य सारः देयः ।** **०८**

*१. मार्कण्डेयस्य मायादर्शनम् ।*

*२. श्रीमद्भागवतमहिमा ।*

**प्रश्नः ६** **प्रदत्तेभ्यः त्रयाणाम् एकैकवाक्येन उत्तरं दत्त ।** **०३**

*(१) द्वादशस्कन्धे कति अध्यायाः सन्ति ?*

*(२) मार्कण्डेयस्य पितुर्नाम किम् ?*

*(३) इन्द्रः कस्य तपस्यां विनष्टुमिच्छति ?*

*(४) भगवान् कस्मै वरं स्वीकर्तुं न्यवेदयत् ?*

*(५) सर्वविद्यानामीश्वरः' देवः कः ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ७** **ससन्दर्भं एकस्य व्याख्या कार्या ।** **०४**

(१) *सत्यनारायणस्येदं व्रतं सर्वेप्सितप्रदम् ।*
*तस्य प्रसादान्मे सर्वं धनधान्यादिकं महत् ॥*

(२) *त्वन्मायामोहिताः सर्वे ब्रह्माद्यास्त्रिदिवौकसः ।*
*न जानन्ति गुणान् रूपं तवाश्चर्यमिदं प्रभो ॥*

**प्रश्नः ८** **कस्याप्येकस्य सारः दातव्यः ।** **०८**

*१. कथायाः प्रथमाध्याये पठितः नारद-भगवतोः संवादः ।*

*२. सत्यनारायणकथासारः ।*

**प्रश्नः ९** **त्रयाणां लघूत्तराणि देयानि ।** **०३**

*(१) शौनकादयः सूतं कुत्र प्रश्नं पप्रच्छुः ?*

*(२) नारदः लोकान् पर्यटन् कुत्र उपागतः ?*

*(३) जितेन्द्रियः सत्यवादी राजा को आसीत् ?*

*(४) मर्त्यलोके जनाः कैः पच्यन्ते ?*

*(५) कलावती द्विजालये किं दृष्टवती ?*

## चतुर्थान्वितिः ( युनिट - ४ )

**प्रश्नः १०** **कस्याप्येकस्य सूत्रस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

(१) *कस्तरति कस्तरति मायाम् ।*

(२) *सुखदुःखेच्छालाभादित्यक्ते काले प्रतीक्ष्यमाणे क्षणार्धमपि व्यर्थं न नेयम् ।*

**प्रश्नः ११** **कस्यचिदेकस्य समीक्षा कर्तव्या ।** **१२**

*१. नारदभक्तिसूत्राणि ।*

*२. भक्तिमहिमा ।*

**प्रश्नः १२** **द्वयोः संक्षेपेण उत्तरं दत्त ।** **०४**

*(१) मानवः कदा आत्मारामो भवति ?*

*(२) नारदभक्तिसूत्रे कति सूत्राणि सन्ति ?*

*(३) गौणी भक्तिः कतिविधा ?*

=०=